# ॥ वाल्मीकि रामायण॥

## १ बालकाण्ड

## अध्याय ६४

अथ हैमवतीं राम दिशं त्यक्त्वा महामुनिः ।
पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणम् ॥१॥

मौनं वर्षसहस्रस्य कृत्वा व्रतमनुत्तमम् ।
चकाराप्रतिमं राम तपः परमदुष्करम् ॥२॥

पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिम् ।
विघ्नैर्बहुभिराधूतं क्रोधो नान्तरमाविशत् ॥३॥

ततो देवाः सगन्धर्वाः पन्नगासुरराक्षसाः ।
मोहितास्तेजसा तस्य तपसा मन्दरश्मयः ।
कश्मलोपहताः सर्वे पितामहमथाब्रुवन् ॥४॥

बहुभिः कारणैर्देव विश्वामित्रो महामुनिः ।
लोभितः क्रोधितश्चैव तपसा चाभिवर्धते ॥५॥

न ह्यस्य वृजिनं किं चिद्दृश्यते सूक्ष्ममप्यथ ।
न दीयते यदि त्वस्य मनसा यदभीप्सितम् ।
विनाशयति त्रैलोक्यं तपसा सचराचरम् ।
व्याकुलाश्च दिशः सर्वा न च किं चित्प्रकाशते ॥६॥

सागराः क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः ।
प्रकम्पते च पृथिवी वायुर्वाति भृशाकुलः ॥७॥

बुद्धिं न कुरुते यावन्नाशे देव महामुनिः ।
तावत्प्रसाद्यो भगवानग्निरूपो महाद्युतिः ॥८॥

कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यतेऽखिलम् ।
देवराज्ये चिकीर्षेत दीयताम् अस्य यन्मतम् ॥९॥

ततः सुरगणाः सर्वे पितामहपुरोगमाः ।
विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् ॥१०॥

ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ।
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥११॥

दीर्घमायुश्च ते ब्रह्मन्ददामि समरुद्गणः ।
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य यथासुखम् ॥१२॥

पितामहवचः श्रुत्वा सर्वेषां च दिवौकसाम् ।
कृत्वा प्रणामं मुदितो व्याजहार महामुनिः ॥१३॥

ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ।
ओङ्कारोऽथ वषट्कारो वेदाश्च वरयन्तु माम् ॥१४॥

क्षत्रवेदविदां श्रेष्ठो ब्रह्मवेदविदाम् अपि ।
ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः ।
यद्ययं परमः कामः कृतो यान्तु सुरर्षभाः ॥१५॥

ततः प्रसादितो देवैर्वसिष्ठो जपतां वरः ।
सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥१६॥

ब्रह्मर्षित्वं न सन्देहः सर्वं सम्पत्स्यते तव ।
इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतम् ॥१७॥

विश्वामित्रोऽपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमम् ।
पूजयामास ब्रह्मर्षिं वसिष्ठं जपतां वरम् ॥१८॥

कृतकामो महीं सर्वां चचार तपसि स्थितः ।
एवं त्वनेन ब्राह्मण्यं प्राप्तं राम महात्मना ॥१९॥

एष राम मुनिश्रेष्ठ एष विग्रहवांस्तपः ।
एष धर्मः परो नित्यं वीर्यस्यैष परायणम् ॥२०॥

शतानन्दवचः श्रुत्वा रामलक्ष्मणसंनिधौ ।
जनकः प्राञ्जलिर्वाक्यमुवाच कुशिकात्मजम् ॥२१॥

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव ।
यज्ञं काकुत्स्थ सहितः प्राप्तवानसि धार्मिक ॥२२॥

पावितोऽहं त्वया ब्रह्मन्दर्शनेन महामुने ।
गुणा बहुविधाः प्राप्तास्तव सन्दर्शनान्मया ॥२३॥

विस्तरेण च ते ब्रह्मन्कीर्त्यमानं महत्तपः ।
श्रुतं मया महातेजो रामेण च महात्मना ॥२४॥

सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः ॥ २५ ॥

अप्रमेयं तपस्तुभ्यमप्रमेयं च ते बलम् ।
अप्रमेया गुणाश्चैव नित्यं ते कुशिकात्मज ॥ २६ ॥

तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो ।
कर्मकालो मुनिश्रेष्ठ लम्बते रविमण्डलम् ॥ २७ ॥

श्वः प्रभाते महातेजो द्रष्टुमर्हसि मां पुनः ।
स्वागतं तपसां श्रेष्ठ मामनुज्ञातुमर्हसि ॥ २८ ॥

एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ।
प्रदक्षिणं चकाराशु सोपाध्यायः सबान्धवः ॥ २९ ॥

विश्वामित्रोऽपि धर्मात्मा सहरामः सलक्ष्मणः ।
स्वं वाटमभिचक्राम पूज्यमानो महर्षिभिः ॥ ३० ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com